# Shri Bhagavadacharyavirachitam Yatirajamangalam

# શ્રીભગવદાચાર્યવિરચિતં યતિરાજમઙ્ગલં

## Document Information

Text title : Shri Bhagavadacharyavirachitam Yatirajamangalam

File name : yatirAjamangalaMbhagavadAchArya.itx

Category : deities_misc, rAmAnanda, mangala, gurudev

Location : doc_deities_misc

Author : trivedopAhnabrahmachArishrIbhagavadAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીભગવદાચાર્યવિરચિતં યતિરાજમઙ્ગલં

પુણ્યસદ્યાત્મજાય શ્રીધન્યકન્યાઙ્કુભૂશ્રિયે ।
રાઘવાનન્દપુણ્યશ્રીભૂષારત્નાય મઙ્ગલમ્ ॥ ૧॥

રામસીતાઞ્જનાસૂનુબ્રહ્માદિપરિરક્ષિતામ્ ।
શ્રીસમ્પ્રદાયસમ્ભૂતિં વર્દ્ધયિત્રેઽસ્તુ મઙ્ગલમ્ ॥ ૨॥

રામમન્ત્રમહારાજરાજ્યજીવાતુરક્ષિણે ।
સર્વતન્ત્રસ્વતન્ત્રાય રામાનન્દાય મઙ્ગલમ્ ॥ ૩॥

સર્વવેદાર્થસત્તત્ત્વસત્ત્વસદ્રત્નરાશયે ।
જગદાનન્દનાનન્દભાષ્યકરાય મઙ્ગલમ્ ॥ ૪॥

ત્રિલોકીનાથતાદ્યોતિ સ્વાત્મજ્યોતિઃ પ્રકાશકમ્ ।
ત્રિદણ્ડં દધતે યમિભૂસાર્વભૌમાય મઙ્ગલમ્ ॥ ૫॥

કષાયાભાવસંસૂચિકાષાયામ્બરધારિણે ।
શ્રીમતે યતિરાજાય રામાનન્દાય મઙ્ગલમ્ ॥ ૬॥

ઉપદેશસુધાવર્ષિવચનારચનાશ્રિયા ।
મઙ્ગલં દિશતે નિત્યં જીવજાતાય મઙ્ગલમ્ ॥ ૭॥

જગત્સન્ત્રાસસન્ત્રસ્તજીવોદ્ધારાધ્વકારિણે ।
દિવ્યસમ્પત્તિસંશોભિમાનસાયાસ્તુ મઙ્ગલમ્ ॥ ૮॥

સર્વજીવમહામોહિમાયાકાયાભિભૂતયે ।
સર્વશક્તિપ્રદાય શ્રીરામાનન્દાય મઙ્ગલમ્ ॥ ૯॥

વિદ્યામહીમહીપાયાવિદ્યાસન્તમસચ્છિદે ।
ધર્મરૂપાય ભૂપાય ધર્મભૂમેશ્ચ મઙ્ગલમ્ ॥ ૧૦॥

ઇતિ ત્રિવેદોપાહ્વબ્રહ્મચારિશ્રીભગવદાચાર્યવિરચિતં યતિરાજમઙ્ગલં સમાપ્તમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Bhagavadacharyavirachitam Yatirajamangalam*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*